ॐ

Śrī Sāī Rām

# ॥ श्रीरुद्रप्रश्नः ॥

śrīrudrapraśnaḥ

चमकं नमकं चैव पौरुषसूक्तं तथैव च।

नित्यं त्रयं प्रयुञ्जानो ब्रह्मलोके महीयते॥

camakaṁ namakaṁ caiva pauruṣasūktaṁ tathaiva ca
nityaṁ trayaṁ prayuñjāno brahmaloke mahīyate

*A person reciting and applying daily the Chamakam, Namakam and Puruṣa Sūktam is honored in the Brahma loka.*

## *Anuvakam 1*

ॐ नमो भगवते रुद्राय॥

om namo bhagavate rudrāya

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः।

om namaste rudra manyava utota iṣave namaḥ

नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः।

namaste astu dhanvane bāhubhyāmuta te namaḥ

या त इषुः शिवतमा शिवं बभूव ते धनुः।

yā ta iṣuḥ śivatamā śivaṁ babhūva te dhanuḥ

शिवा शरव्या या तव तया नो रुद्र मृडय।

śivā śaravyā yā tava tayā no rudra mṛḍaya

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।

yā te rudra śivā tanūraghorā'pāpakāśinī

तया नस्तनुवा शन्तमया गिरिशंताभिचाकशीहि।

tayā nastanuvā śantamayā giriśaṁtābhicākaśīhi

यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे।

yāmiṣuṁ giriśaṁta haste bibharṣyastave

शिवां गिरित्र तां कुरु मा हिग्ंसीः पुरुषं जगत्।

śivāṁ giritra tāṁ kuru mā higṁsīḥ puruṣaṁ jagat

शिवेन वचसा त्वा गिरिशाच्छावदामसि।

śivena vacasā tvā giriśācchāvadāmasi

यथा नः सर्वमिज्जगदयक्ष्मगं सुमना असत्।

yathā naḥ sarvamijjagadayakṣmagṁ sumanā asat

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।

adhyavocadadhivaktā prathamo daivyo bhiṣak

अहीग्ंश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः।

ahīgśca sarvāñjambhayantsarvāśca yātudhānyaḥ

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः।

asau yastamro aruṇa uta babhruḥ sumaṅgalaḥ

ये चेमागं रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषागं हेड ईमहे।

ye cemāgṁ rudrā abhito dikṣu śritāḥ sahasraśo'vaiṣāgṁ heḍa īmahe

असौ योऽवसर्पति नीलग्रीवो विलोहितः।

asau yo'vasarpati nīlagrīvo vilohitaḥ

उतैनं गोपा अदृशन्नदृशन्नुदहार्यः।

utainaṁ gopā adṛśannadṛśannudahāryaḥ

उतैनं  विश्वा भूतानि स दृष्टो मृडयाति नः।

utainaṁ  viśvā bhūtāni sa dṛṣto mṛḍayāti naḥ

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।

namo astu nīlagrīvāya sahasrākṣāya mīḍhuṣe

अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन्नमः।

atho ye asya satvāno'haṁ tebhyo'karannamaḥ

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नि योर्ज्याम्।

pramuñca dhanvanastvamubhayorārtni yorjyām

याश्च ते हस्त इषवः परा ता भगवो वप।

yāśca te hasta iṣavaḥ parā tā bhagavo vapa

अवतत्य धनुस्त्वगं सहस्राक्ष शतेषुधे।

avatatya dhanustvagṁ sahasrākṣa śateṣudhe

निशीर्य शल्यानां मुखा शिवो नः सुमना भव।

niśīrya śalyānāṁ mukhā śivo naḥ sumanā bhava

विज्यं धनुः कपर्दिनो विशल्यो बाणवाग्ं उत।

vijyaṁ dhanuḥ kapardino viśalyo bāṇavāgṁ uta

अनेशन्नस्येषव आभुरस्य निषंगथिः।

aneśannasyeṣava ābhurasya niṣaṁgathiḥ

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः।

yā te hetirmīḍhuṣṭama haste babhūva te dhanuḥ

तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज।

tayā'smān viśvatastvamayakṣmayā paribbhuja

नमस्ते अस्त्वायुधायानातताय धृष्णवे।

namaste astvāyudhāyānātatāya dhṛṣṇave

उभाभ्यामुत ते नमो बाहुभ्याम् तव धन्वने।

ubhābhyāmuta te namo bāhubhyām tava dhanvane

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः।

pari te dhanvano hetirasmānvṛṇaktu viśvataḥ

अथो य इषुधिस्तवारे अस्मन्निधेहि तम्॥

atho ya iṣudhistavāre asmannidhehi tam

नमस्ते अस्तु भगवन् विश्वेश्वराय महादेवाय त्र्यम्बकाय
त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय
मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः॥

namaste astu bhagavan viśveśvarāya mahādevāya tryambakāya tripurāntakāya trikāgnikālāya kālāgnirudrāya nīlakaṇṭhāya mṛtyuñjayāya sarveśvarāya sadāśivāya śrīmanmahādevāya namaḥ

## *Anuvakam 2*

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो

namo hiraṇyabāhave senānye diśāṁ ca pataye namo

नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो

namo vṛkṣebhyo harikeśebhyaḥ paśūnāṁ pataye namo

नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो

namaḥ saspiñjarāya tviṣīmate pathīnāṁ pataye namo

नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो

namo babhluśāya vivyādhine'nnānāṁ pataye namo

नमो हरिकेशायोपवीतिने पुष्टाणं पतये नमो

namo harikeśāyopavītine puṣṭāṇaṁ pataye namo

नमो भवस्य हेत्यै जगतां पतये नमो

namo bhavasya hetyai jagatāṁ pataye namo

नमो रुद्रायाततााविने क्षेत्राणां पतये नमो

namo rudrāyātatāvine kṣetrāṇāṁ pataye namo

नमः सूतायाहन्त्याय वनानां पतये नमो

namaḥ sūtāyāhantyāya vanānāṁ pataye namo

नमो रोहिताय स्थपतये वृक्षाणं पतये नमो

namo rohitāya sthapataye vṛkṣāṇaṁ pataye namo

नमो मन्त्रिणे वाणिजाय कक्षाणं पतये नमो

namo mantriṇe vāṇijāya kakṣāṇaṁ pataye namo

नमो भुवंतये वारिवस्कृतायौषधीनां पतये नमो

namo bhuvaṁtaye vārivaskṛtāyauṣadhīnāṁ pataye namo

नम॑ उ॒च्चैर्घो॑षायाक्र॒न्दय॑ते पत्ती॒नाम्॒ पत॑ये॒ नमो॒

nama̍ u̱ccairgho̍ṣāyākra̱ndaya̍te pattī̱nām pata̍ye̱ namo̱

नम॑ः कृ॒त्स्नवी॒ताय॒ धाव॑ते॒ सत्व॑नां॒ पत॑ये॒ नम॑ः ॥

nama̍ḥ kṛtsnavī̱tāya̱ dhāva̍te̱ satva̍nā̱ṁ pata̍ye̱ nama̍ḥ

## *Anuvakam 3*

नम॒ः सह॑मानाय निव्या॒दिन॑ आव्या॒धिनी॑नां॒ पत॑ये॒ नमो॒

nama̱ḥ saha̍mānāya nivyā̱dina̍ āvyā̱dhinī̍nā̱ṁ pata̍ye̱ namo̱

नम॑ः ककु॒भाय॑ निष॒ङ्गिणे॑ स्ते॒नानां॒ पत॑ये॒ नमो॒

nama̍ḥ kaku̱bhāya̍ niṣa̱ṅgiṇe̍ ste̱nānā̱ṁ pata̍ye̱ namo̱

नमो॑ निष॒ङ्गिण॑ इषुधि॒मते॒ तस्क॑राणां॒ पत॑ये॒ नमो॒

namo̍ niṣa̱ṅgiṇa̍ iṣudhi̱mate̱ taska̍rāṇā̱ṁ pata̍ye̱ namo̱

नमो॒ वञ्च॑ते परि॒वञ्च॑ते स्तायू॒नां पत॑ये॒ नमो॒

namo̱ vañca̍te pari̱vañca̍te stāyū̱nāṁ pata̍ye̱ namo̱

नमो॑ निचे॒रवे॑ परिच॒रायार॑ण्यानां॒ पत॑ये॒ नमो॒

namo̍ nice̱rave̍ parica̱rāyāra̍ṇyānā̱ṁ pata̍ye̱ namo̱

नम॑ः सृका॒विभ्यो॒ जिघाग्ं॑सद्भ्यो मुष्ण॒तां पत॑ये॒ नमो॒

nama̍ḥ sṛkā̱vibhyo̱ jighāgṁ̍sadbhyo muṣṇa̱tāṁ pata̍ye̱ namo̱

नमो॑ऽसि॒मद्भ्यो॒ नक्तं॒चर॑द्भ्यः प्रकृ॒न्तानां॒ पत॑ये॒ नमो॒

namo̍'si̱madbhyo̱ nakta̱ṁcara̍dbhyaḥ prakṛ̱ntānā̱ṁ pata̍ye̱ namo̱

नम॑ उष्णी॒षिने॑ गिरिच॒राय॑ कुलु॒ञ्चानां॒ पत॑ये॒ नमो॒

nama̍ uṣṇī̱ṣine̍ girica̱rāya̍ kulu̱ñcānā̱ṁ pata̍ye̱ namo̱

नम॒ इषु॑मद्भ्यो धन्वा॒विभ्य॑श्च वो॒ नमो॒

nama̱ iṣu̍madbhyo dhanvā̱vibhya̍śca vo̱ namo̱

नम॑ आतन्वा॒नेभ्य॑ः प्रति॒दधा॑नेभ्यश्च वो॒ नमो॒

nama̍ ātanvā̱nebhya̍ḥ prati̱dadhā̍nebhyaśca vo̱ namo̱

नम॑ आ॒यच्छ॑द्भ्यो विसृ॒जद्भ्य॑श्च वो॒ नमो॒

nama̍ ā̱yaccha̍dbhyo visṛ̱jadbhya̍śca vo̱ namo̱

नमोऽस्य॑द्भ्यो॒ विध्य॑द्भ्यश्च वो॒ नमो॒

namo'sya̍dbhyo̱ vidhya̍dbhyaśca vo̱ namo̱

नम॒ आसी॑नेभ्यः॒ शया॑नेभ्यश्च वो॒ नमो॒

nama̱ āsī̍nebhya̱ḥ śayā̍nebhyaśca vo̱ namo̱

नम॑ः स्व॒पद्भ्यो॒ जाग्र॑द्भ्यश्च वो॒ नमो॒

nama̍ḥ sva̱padbhyo̱ jāgra̍dbhyaśca vo̱ namo̱

नम॒स्तिष्ठ॑द्भ्यो॒ धाव॑द्भ्यश्च वो॒ नमो॒

nama̱stiṣṭha̍dbhyo̱ dhāva̍dbhyaśca vo̱ namo̱

नम॑ः स॒भाभ्य॑ः स॒भाप॑तिभ्यश्च वो॒ नमो॒

nama̍ḥ sa̱bhābhya̍ḥ sa̱bhāpa̍tibhyaśca vo̱ namo̱

नमो॒ अश्वे॒भ्योऽश्व॑पतिभ्यश्च वो॒ नम॑ः ॥

namo̱ aśve̱bhyo'śva̍patibhyaśca vo̱ nama̍ḥ

## *Anuvakam 4*

नम॑ आव्या॒धिनी᳚भ्यो वि॒विध्य॑न्तीभ्यश्च वो॒ नमो॒

nama̍ āvyā̱dhinī̎bhyo vi̱vidhya̍ntībhyaśca vo̱ namo̱

नम॒ उग॑णाभ्यस्तृꣳह॒तीभ्य॑श्च वो॒ नमो॒

nama̱ uga̍ṇābhyastṛgm̐ha̱tībhya̍śca vo̱ namo̱

नमो॑ गृ॒त्सेभ्यो॑ गृ॒त्सप॑तिभ्यश्च वो॒ नमो॒

namo̍ gṛ̱tsebhyo̍ gṛ̱tsapa̍tibhyaśca vo̱ namo̱

नमो॒ व्राते᳚भ्यो॒ व्रात॑पतिभ्यश्च वो॒ नमो॒

namo̱ vrāte̎bhyo̱ vrāta̍patibhyaśca vo̱ namo̱

नमो॑ ग॒णेभ्यो॑ ग॒णप॑तिभ्यश्च वो॒ नमो॒

namo̍ ga̱ṇebhyo̍ ga̱ṇapa̍tibhyaśca vo̱ namo̱

नमो॒ विरू॑पेभ्यो वि॒श्वरू॑पेभ्यश्च वो॒ नमो॒

namo̱ virū̍pebhyo vi̱śvarū̍pebhyaśca vo̱ namo̱

नमो॑ म॒हद्भ्यः॑ क्षुल्ल॒केभ्य॑श्च वो॒ नमो॒

namo̍ ma̱hadbhya̍ḥ kṣulla̱kebhya̍śca vo̱ namo̱

नमो॑ र॒थिभ्यो॑ऽर॒थेभ्य॑श्च वो॒ नमो॒

namo̍ ra̱thibhyo̍'ra̱thebhya̍śca vo̱ namo̱

नमो॒ रथे᳚भ्यो॒ रथ॑पतिभ्यश्च वो॒ नमो॒

namo̱ rathe̎bhyo̱ ratha̍patibhyaśca vo̱ namo̱

नमः॒ सेना᳚भ्यः सेना॒निभ्य॑श्च वो॒ नमो॒

namaḥ̱ senā̎bhyaḥ senā̱nibhya̍śca vo̱ namo̱

नमः॑ क्ष॒त्तृभ्यः॑ संग्रही॒तृभ्य॑श्च वो॒ नमो॒

nama̍ḥ kṣa̱ttṛbhya̍ḥ saṁgrahī̱tṛbhya̍śca vo̱ namo̱

नम॒स्तक्ष॑भ्यो रथका॒रेभ्य॑श्च वो॒ नमो॒

nama̱stakṣa̍bhyo rathakā̱rebhya̍śca vo̱ namo̱

नमः॒ कुला॑लेभ्यः क॒र्मारे᳚भ्यश्च वो॒ नमो॒

namaḥ̱ kulā̍lebhyaḥ ka̱rmāre̎bhyaśca vo̱ namo̱

नमः॑ पु॒ञ्जिष्टे᳚भ्यो निषा॒देभ्य॑श्च वो॒ नमो॒

nama̍ḥ pu̱ñjiṣṭe̎bhyo niṣā̱debhya̍śca vo̱ namo̱

नम॑ इषु॒कृद्भ्यो॑ धन्व॒कृद्भ्य॑श्च वो॒ नमो॒

nama̍ iṣu̱kṛdbhyo̍ dhanva̱kṛdbhya̍śca vo̱ namo̱

नमो॑ मृग॒युभ्यः॑ श्व॒निभ्य॑श्च वो॒ नमो॒

namo̍ mṛga̱yubhya̍ḥ śva̱nibhya̍śca vo̱ namo̱

नमः॒ श्वभ्यः॒ श्वप॑तिभ्यश्च वो॒ नमः॑ ॥

namaḥ̱ śvabhyaḥ̱ śvapa̍tibhyaśca vo̱ nama̍ḥ

## *Anuvakam 5*

नमो॑ भ॒वाय॑ च रु॒द्राय॑ च॒

namo̍ bha̱vāya̍ ca ru̱drāya̍ ca̱

नमः॑ श॒र्वाय॑ च पशु॒पत॑ये च॒

nama̍ḥ śa̱rvāya̍ ca paśu̱pata̍ye ca̱

नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च॒

namo̱ nīla̍grīvāya ca śiti̱kaṇṭhā̍ya ca̱

नमः॑ कप॒र्दिने॑ च॒ व्यु॑प्तकेशाय च॒

nama̍ḥ kapa̱rdine̍ ca̱ vyu̍ptakeśāya ca̱

नमः॑ सहस्रा॒क्षाय॑ च श॒तध॑न्वने च॒

nama̍ḥ sahasrā̱kṣāya̍ ca śa̱tadha̍nvane ca̱

नमो॑ गिरि॒शाय॑ च शिपिवि॒ष्टाय॑ च॒

namo̍ giri̱śāya̍ ca śipivi̱ṣṭāya̍ ca̱

नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च॒

namo̍ mī̱ḍhuṣṭa̍māya̱ ceṣu̍mate ca̱

नमो᳚ ह्र॒स्वाय॑ च वाम॒नाय॑ च॒

namo̎ hra̱svāya̍ ca vāma̱nāya̍ ca̱

नमो॑ बृह॒ते च॒ वर्षी॑यसे च॒

namo̍ bṛha̱te ca̱ varṣī̍yase ca̱

नमो वृद्धाय च संवृद्वने च

namo vṛddhāya ca saṁvṛdvane ca

नमो अग्रियाय च प्रथमाय च

namo agriyāya ca prathamāya ca

नम आशवे चाजिराय च

nama āśave cājirāya ca

नमः शीघ्रियाय च शीभ्याय च

namaḥ śīghriyāya ca śībhyāya ca

नम ऊर्म्याय चावस्वन्याय च

nama ūrmyāya cāvasvanyāya ca

नमः स्रोतस्याय च द्वीप्याय च॥

namaḥ srotasyāya ca dvīpyāya ca

## *Anuvakam 6*

नमो ज्येष्ठाय च कनिष्ठाय च

namo jyeṣṭhāya ca kaniṣṭhāya ca

नमः पूर्वजाय चापरजाय च

namaḥ pūrvajāya cāparajāya ca

नमो मध्यमाय चापगल्भाय च

namo madhyamāya cāpagalbhāya ca

नमो जघन्याय च बुध्नियाय च

namo jaghanyāya ca budhniyāya ca

नमः सोभ्याय च प्रतिसर्याय च

namaḥ sobhyāya ca pratisaryāya ca

नमो याम्याय च क्षेम्याय च

namo yāmyāya ca kṣemyāya ca

नम उर्वर्याय च खल्याय च

nama urvaryāya ca khalyāya ca

नमः श्लोक्याय चाऽवसान्याय च

namaḥ ślokyāya cā'vasānyāya ca

नमो वन्याय च कक्ष्याय च

namo vanyāya ca kakṣyāya ca

नमः श्रवाय च प्रतिश्रवाय च

namaḥ śravāya ca pratiśravāya ca

नम आशुषेणाय चाशुरथाय च

nama āśuṣeṇāya cāśurathāya ca

नमः शूराय चावभिन्दते च

namaḥ śūrāya cāvabhindate ca

नमो वर्मिणे च वरूथिने च

namo varmiṇe ca varūthine ca

नमो बिल्मिने च कवचिने च

namo bilmine ca kavacine ca

नमः श्रुताय च श्रुतसेनाय च॥

namaḥ śrutāya ca śrutasenāya ca

## *Anuvakam 7*

नमो दुन्दुभ्याय चाहनन्याय च

namo dundubhyāya cāhananyāya ca

नमो धृष्णवे च प्रमृशाय च

namo dhṛṣṇave ca pramṛśāya ca

नमो दूताय च प्रहिताय च

namo dūtāya ca prahitāya ca

नमो निषङ्गिणे चेषुधिमते च

namo niṣaṅgiṇe ceṣudhimate ca

नमस्तीक्ष्णेषवे चायुधिने च

namastīkṣṇeṣave cāyudhine ca

नम॑ः स्वायु॒धाय॑ च सु॒धन्व॑ने च॒

nama̍ḥ svāyu̱dhāya̍ ca su̱dhanva̍ne ca̱

नम॒ः स्रुत्या॑य च॒ पथ्या॑य च॒

nama̱ḥ srutyā̍ya ca̱ pathyā̍ya ca̱

नम॑ः का॒ट्या॑य च नी॒प्या॑य च॒

nama̍ḥ kā̱ṭyā̍ya ca nī̱pyā̍ya ca̱

नम॒ः सूद्या॑य च सर॒स्या॑य च॒

nama̱ḥ sūdyā̍ya ca sara̱syā̍ya ca̱

नमो॑ ना॒द्याय॑ च वैश॒न्ताय॑ च॒

namo̍ nā̱dyāya̍ ca vaiśa̱ntāya̍ ca̱

नम॒ः कूप्या॑य चाव॒ट्या॑य च॒

nama̱ḥ kūpyā̍ya cāva̱ṭyā̍ya ca̱

नमो॒ वर्ष्या॑य चाव॒र्ष्याय॑ च॒

namo̱ varṣyā̍ya cāva̱rṣyāya̍ ca̱

नमो॑ मे॒घ्या॑य च विद्यु॒त्या॑य च॒

namo̍ me̱ghyā̍ya ca vidyu̱tyā̍ya ca̱

नम॑ ई॒ध्रिया॑य चात॒प्या॑य च॒

nama̍ ī̱dhriyā̍ya cāta̱pyā̍ya ca̱

नमो॒ वात्या॑य च॒ रेष्मि॑याय च॒

namo̱ vātyā̍ya ca̱ reṣmi̍yāya ca̱

नमो॑ वास्त॒व्या॑य च वास्तु॒ पाय॑ च ॥

namo̍ vāsta̱vyā̍ya ca vāstu̱ pāya̍ ca

## *Anuvakam 8*

ॐ हर हर हर हर ॐ

om hara hara hara hara om

नम॒ः सोमा॑य च रु॒द्राय॑ च॒

nama̱ḥ somā̍ya ca ru̱drāya̍ ca̱

नम॑स्ता॒म्राय॑ चारु॒णाय॑ च॒

nama̍stā̱mrāya̍ cāru̱ṇāya̍ ca̱

नम॑ः श॒ङ्गाय॑ च पशु॒पत॑ये च॒

nama̍ḥ śa̱ṅgāya̍ ca paśu̱pata̍ye ca̱

नम॑ उ॒ग्राय॑ च भी॒माय॑ च॒

nama̍ u̱grāya̍ ca bhī̱māya̍ ca̱

नमो॑ अग्रेव॒धाय॑ च दूरेव॒धाय॑ च॒

namo̍ agreva̱dhāya̍ ca dūreva̱dhāya̍ ca̱

नमो॑ ह॒न्त्रे च॒ हनी॑यसे च॒

namo̍ ha̱ntre ca̱ hanī̍yase ca̱

नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यो॒

namo̍ vṛ̱kṣebhyo̱ hari̍keśebhyo̱

नम॑स्ता॒राय॒ नम॑श्शं॒भवे॑ च मयो॒भवे॑ च॒

nama̍stā̱rāya̱ nama̍śśa̱ṁbhave̍ ca mayo̱bhave̍ ca̱

नम॑ः शङ्क॒राय॑ च मयस्क॒राय॑ च॒

nama̍ḥ śaṅka̱rāya̍ ca mayaska̱rāya̍ ca̱

नम॑ः शि॒वाय॑ च शि॒वत॑राय च॒

nama̍ḥ śi̱vāya̍ ca śi̱vata̍rāya ca̱

नम॒स्तीर्थ्या॑य च॒ कूल्या॑य च॒

nama̱stīrthyā̍ya ca̱ kūlyā̍ya ca̱

नम॑ः पा॒र्या॑य चावा॒र्या॑य च॒

nama̍ḥ pā̱ryā̍ya cāvā̱ryā̍ya ca̱

नमः प्रतरणाय चोत्तरणाय च

namaḥ prataraṇāya cottaraṇāya ca

नम आतार्याय चालाद्याय च

nama ātāryāya cālādyāya ca

नमः शष्प्याय च फेन्याय च

namaḥ śaṣpyāya ca phenyāya ca

नमः सिकत्याय च प्रवाह्याय च॥

namaḥ sikatyāya ca pravāhyāya ca

## *Anuvakam 9*

नम इरिण्याय च प्रपथ्याय च

nama iriṇyāya ca prapathyāya ca

नमः किग्ंशिलाय च क्षयणाय च

namaḥ kigṁśilāya ca kṣayaṇāya ca

नमः कपर्दिने च पुलस्तये च

namaḥ kapardine ca pulastaye ca

नमो गोष्ठ्याय च गृह्याय च

namo goṣṭhyāya ca gṛhyāya ca

नमस्तल्प्याय च गेह्याय च

namastalpyāya ca gehyāya ca

नमः काट्याय च गह्वरेष्ठाय च

namaḥ kāṭyāya ca gahvareṣṭhāya ca

नमो ह्रदय्याय च निवेष्प्याय च

namo hradayyāya ca niveṣpyāya ca

नमः पाग्ं सव्याय च रजस्याय च

namaḥ pāgṁ savyāya ca rajasyāya ca

नमः शुष्क्याय च हरित्याय च

namaḥ śuṣkyāya ca harityāya ca

नमो लोप्याय चोलप्याय च

namo lopyāya colapyāya ca

नम ऊर्व्याय च सूर्म्याय च

nama ūrvyāya ca sūrmyāya ca

नमः पर्ण्याय च पर्णशद्याय च

namaḥ parṇyāya ca parṇaśadyāya ca

नमोऽपगुरमाणाय चाभिघ्नते च

namo'paguramāṇāya cābhighnate ca

नम आख्खिदते च प्रख्खिदते च

nama ākhkhidate ca prakhkhidate ca

नमो वः किरिकेभ्यो देवानाग्ं हृदयेभ्यो

namo vaḥ kirikebhyo devānāgṁ hṛdayebhyo

नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो

namo vikṣīṇakebhyo namo vicinvatkebhyo

नम आनिर्हतेभ्यो नम आमीवत्केभ्यः॥

nama ānirhatebhyo nama āmīvatkebhyaḥ

## *Anuvakam 10*

द्रापे अन्धसस्पते दरिद्रन्नीललोहित।

drāpe andhasaspate daridrannīlalohita

एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किंचनाममत्।

eṣāṁ puruṣāṇāmeṣāṁ paśūnāṁ mā bhermā'ro mo eṣāṁ kiṁcanāmamat

या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी।

yā te rudra śivā tanūḥ śivā viśvāhabheṣajī

शिवा रुद्रस्य भेषजी तया नो मृड जीवसे।

śivā rudrasya bheṣajī tayā no mṛḍa jīvase

इमागं रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम्।

imāgṁ rudrāya tavase kapardine kṣayadvīrāya prabharāmahe matim

यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्।

yathā naḥ śamasaddvipade catuṣpade viśvaṁ puṣṭaṁ grāme asminnanāturam

मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते।

mṛḍā no rudrota no mayaskṛdhi kṣayadvīrāya namasā vidhema te

यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ।

yacchaṁ ca yośca manurāyaje pitā tadaśyāma tava rudra praṇītau

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।

mā no mahāntamuta mā no arbhakaṁ mā na ukṣantamuta mā na ukṣitam

मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः।

mā no'vadhīḥ pitaraṁ mota mātaraṁ priyā mā nastanuvo rudra rīriṣaḥ

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।

mā nastoke tanaye mā na āyuṣi mā no goṣu mā no aśveṣu rīriṣaḥ

वीरान्मा नो रुद्र भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते।

vīrānmā no rudra bhāmito'vadhīrhaviṣmanto namasā vidhema te

आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु।

ārātte goghna uta pūruṣaghne kṣayadvīrāya sumnamasme te astu

रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः।

rakṣā ca no adhi ca deva brūhyadhā ca naḥ śarma yaccha dvibarhāḥ

स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममुपहत्नुमुग्रम्।

stuhi śrutaṁ gartasadaṁ yuvānaṁ mṛganna bhīmamupahatnumugram

मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः।

mṛḍā jaritre rudra stavāno anyante asmannivapantu senāḥ

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मति रघायोः।

pariṇo rudrasya hetirvṛṇaktu pari tveṣasya durmati raghāyoḥ

अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय।

ava sthirā maghavadbhyastanuṣva mīḍhvastokāya tanayāya mṛḍaya

मीढुष्टम शिवतम शिवो नः सुमना भव।

mīḍhuṣṭama śivatama śivo naḥ sumanā bhava

परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि।

parame vṛkṣa āyudhannidhāya kṛttiṁ vasāna ācara pinākaṁ bibhradāgahi

विकिरिद विलोहित नमस्ते अस्तु भगवः।

vikirida vilohita namaste astu bhagavaḥ

यास्ते सहस्रगं हेतयोन्यमस्मन्निवपन्तु ताः।

yāste sahasragṁ hetayonyamasmannivapantu tāḥ

सहस्राणि सहस्रधा बाहुवोस्तव हेतयः।

sahasrāṇi sahasradhā bāhuvostava hetayaḥ

तासामीशानो भगवः पराचीना मुखा कृधि॥

tāsāmīśāno bhagavaḥ parācīnā mukhā kṛdhi

## *Anuvakam 11*

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम्।

sahasrāṇi sahasraśo ye rudrā adhi bhūmyām

तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि।

teṣāgṁ sahasrayojane'vadhanvāni tanmasi

अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि।

asminmahatyarṇave'ntarikṣe bhavā adhi

नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः।

nīlagrīvāḥ śitikaṇṭhāḥ śarvā adhaḥ kṣamācarāḥ

नीलग्रीवाः शितिकण्ठा दिवगं रुद्रा उपश्रिताः।

nīlagrīvāḥ śitikaṇṭhā divagṁ rudrā upaśritāḥ

ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः।

ye vṛkṣeṣu saspiñjarā nīlagrīvā vilohitāḥ

ये भूतानामधिपतयो विशिखासः कपर्दिनः।

ye bhūtānāmadhipatayo viśikhāsaḥ kapardinaḥ

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्।

ye anneṣu vividhyanti pātreṣu pibato janān

ये पथां पथिरक्षय ऐलबृदा यव्युधः।

ye pathāṁ pathirakṣaya ailabṛdā yavyudhaḥ

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः।

ye tīrthāni pracaranti sṛkāvanto niṣaṅgiṇaḥ

य एतावन्तश्च भूयागंसश्च दिशो रुद्रा वितस्थिरे।

ya etāvantaśca bhūyāgṁsaśca diśo rudrā vitasthire

तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि।

teṣāgṁ sahasrayojane'vadhanvāni tanmasi

नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥

namo rudrebhyo ye pṛthivyāṁ ye'ntarikṣe ye divi yeṣāmannaṁ vāto varṣamiṣavastebhyo daśa prācīrdaśa dakṣiṇā daśa pratīcīrdaśodīcīrdaśordhvāstebhyo namaste no mṛḍayantu te yaṁ dviṣmo yaśca no dveṣṭi taṁ vo jambhe dadhāmi

## *Supplement*

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम्।

tryaṁbakaṁ yajāmahe sugandhiṁ puṣṭivardhanam

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥

urvārukamiva bandhanānmṛtyormukṣīya mā'mṛtāt

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु॥

yo rudro agnau yo apsu ya oṣadhīṣu yo rudro viśvā bhuvanā viveśa tasmai rudrāya namo astu

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे।

ye te sahasramayutaṁ pāśā mṛtyo martyāya hantave

तान् यज्ञस्य मायया सर्वानव यजामहे।

tān yajñasya māyayā sarvānava yajāmahe

मृत्यवे स्वाहा मृत्यवे स्वाहा॥

mṛtyave svāhā mṛtyave svāhā

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः।

prāṇānāṁ granthirasi rudro mā viśāntakaḥ

तेनान्नेनाप्यायस्व।

tenānnenāpyāyasva

नमो रुद्राय विष्णवे मृत्युर्मे पाहि॥

namo rudrāya viṣṇave mṛtyurme pāhi

तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य।

tamu ṣṭuhi yaḥ sviṣuḥ sudhanvā yo viśvasya kṣayati bheṣajasya

यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य॥

yakṣvāmahe saumanasāya rudraṁ namobhirdevamasuraṁ duvasya

अयं मे हस्तो भगवानयं मे भगवत्तरः।

ayaṁ me hasto bhagavānayaṁ me bhagavattaraḥ

अयं मे विश्वभेषजोऽयग्ं शिवाभिमर्शनः॥

ayaṁ me viśvabheṣajo'yagṁ śivābhimarśanaḥ

ॐ शान्तिः शान्तिः शान्तिः॥

om śāntiḥ śāntiḥ śāntiḥ